श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीपार्थसार्थिदासेन कृतम्

# ॥ श्रीनिवासस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनिवासस्तुतिः ॥

भक्ताभीष्टप्रदातारं जगन्मङ्गळविग्रहम्।
श्रीकल्याणपुराधीशं श्रीनिवासमहं भजे॥ १ ॥

ऊर्ध्वपुण्ड्रशिरोरत्नं रत्नहारविभूषितम्।
लोकरक्षैकदीक्षञ्च श्रीनिवासमहं भजे॥ २ ॥

अज्ञानतिमिरापोहं तेजोमयसुविग्रहम्।
कलिकल्मषपापघ्नं श्रीनिवासमहं भजे॥ ३ ॥

मोक्षसांराज्यदातारं कावेरीतटकल्पकम्।
श्रीभूमिसहितं वन्दे श्रीनिवासमहं भजे॥ ४ ॥

श्रीमङ्गळपुराधीशं श्रीवत्साङ्कितवक्षसम्।
भक्तार्तिभञ्जनोद्युक्तं श्रीनिवासमहं भजे॥ ५ ॥

शङ्खचक्रगदाहस्तं रत्नकुण्डलमण्डितम्।
वज्रोर्ध्व पुण्ड्रज्वलितं श्रीनिवासमहं भजे॥ ६ ॥

द्विनदीमध्यगं देवं कल्याणपुरनायकम्।
देवर्षिगणसम्पूज्यं श्रीनिवासमहं भजे॥ ७ ॥

साळग्राममयीं भव्यां मालां रत्नविभूषिताम्।
धारयन्तं दयापूर्णं श्रीनिवासमहं भजे॥ ८ ॥

श्रोणर्क्षमकरे मास उद्वाहोत्सवशोभिनम्।
अलर्मेल्नायिकाश्लिष्टं श्रीनिवासमहं भजे॥ ९ ॥

आजानुबाहुसुभगं कमलायतलोचनम्।
रत्नहाटककेयूर भूषणैर्भूषितं भजे॥ १० ॥

www.prapatti.com

द्विनदीसेवितं श्रीशं ब्रह्मरुद्रादिसेवितम्।
जितकन्दर्पसौन्दर्यं श्रीनिवासमहं भजे॥ ११ ॥

कल्याणोत्सवकालेषु वेदघोषेण हर्षितम्।
सङ्गीतरसिकं श्रीशं श्रीनिवासमहं भजे॥ १२ ॥

अभीप्सितप्रदानेन प्रार्थनापूरणोत्सुकम्।
केशवं हेमपट्टाभं श्रीनिवासमहं भजे॥ १३ ॥

रुद्रमुक्तिप्रदं भक्तप्रार्थनापूरणोत्सुकम्।
द्विजारोहणसन्तुष्टं श्रीनिवासमहं भजे॥ १४ ॥

कालक्षेपकथावाग्भिः परितुष्टः श्रियः पतिः।
श्रीनिवासो दीनबन्धुः भूयान्नः श्रेयसे सदा॥ १५ ॥

शिवावनसमर्थाय श्रीभूसंश्लेषतोषिणे।
सर्वदाऽभयहस्ताय नित्यश्रीर्नित्यमङ्गळम्॥ १६ ॥

कलिप्रत्यक्षदेवाय श्रितकल्प महीरुहे।
कलिनाशन दक्षाय श्रीनिवासाय मङ्गळम्॥ १७ ॥

गोविन्दगानतुष्टाय गीर्वाणेशार्चिताङ्घ्रये।
गिरिसप्तकनाथाय श्रीनिवासाय ते नमः॥ १८ ॥

भक्तरक्षणशीलाय जगन्मोहनमूर्तये।
श्रीकल्याणपुरेशाय श्रीनिवासाय मङ्गळम्॥ १९ ॥

पार्थसारथिदासेन कृतेयं भक्तिपूर्विका।
सर्वैश्वर्यप्रदात्री च श्रीनिवासस्तुतिर्भवेत्॥ २० ॥

॥ इति श्रीनिवासस्तुतिः समाप्ता ॥

www.prapatti.com